e-text prepared by Dr.Pavana.MD.(Ay) & Dr.Manoj Sankaranarayana.

ॐ

# ॥ श्री भोजराजविरचितं धाराकल्पः ॥
# ||śrī bhojarājaviracitaṁ dhārākalpaḥ||

## ॥ अथ धाराकल्पः ॥
## || atha dhārākalpaḥ||

अनन्तकल्याणगुनैकभाजनं निरन्तरानन्दचिदेकविग्रहम्।

अनन्तरायेप्सितसिद्धये वयं तमेकदन्तं सततं भजामहे॥ १॥

anantakalyāṇagunaikabhājanaṁ nirantarānandacideka
vigraham|
anantarāyepsitasiddhaye vayaṁ tamekadantaṁ satataṁ bhajāmahe ||1||

धातूनां दृढतां करोति वृषतां देहग्निवर्णौजसाम्।

स्थैर्यं पाटवमिन्द्रियस्य जरसोमान्द्यं चिरं जीवितं॥ २॥

dhātūnāṁ dṛḍhatāṁ karoti vṛṣatāṁ dehagnivarṇaujasām|
sthairyaṁ pāṭavamindriyasya jarasomāndyaṁ ciraṁ jīvitaṁ ||2||

अस्थ्नां भंगमपाकरोति नितरांदोषान् समीरादीकान्।

सर्वस्नेहकृता सुखोष्णसुभगा सर्वागधारा नृणाम्॥ ३॥

asthnāṁ bhaṁgamapākaroti nitarāṁdoṣān samīrādīkān|
sarvasnehakṛtā sukhoṣṇasubhagā sarvāgadhārā nṛṇām ||3||

प्लक्षोदुम्बरगन्धसारवरणन्यग्रोधदेवद्रुमाः पुन्नागाह्वकपित्थचोचबकुलाशोकासनाम्रास्तथा।

दोलाचम्पकविल्वनिम्बखदिरामोघाग्निमन्थार्जुनाः इत्याद्यन्यतमेन सेचनविधौ द्रोणीं प्रकुर्याद् बुधः॥ ४॥

plakṣodumbaragandhasāravaraṇanyagrodhadevadrumāḥ
punnāgāhvakapitthacocabakulāśokāsanāmrāstathā|
dolācampakavilvanimbakhadirāmoghāgnimanthārjunāḥ ityādyanyatamena secanavidhau droṇīṁ prakuryād budhaḥ||4||

द्रोणीं हस्त चतुष्कदीर्घकरमात्रव्यासतत्पादमत्रोद्यभीत्तियुता दृढा समतला पादान्तरन्ध्रा बहिः।
शीर्षस्थान इहोन्नतैककरमात्रा तानविस्तारका मध्यतश्च चरणैर्हस्तैश्च युक्ता दृढैः॥५॥

droṇīṁ hasta catuṣkadīrghakaramātravyāsatatpādamatrodyabhīttiyutā dṛḍhā samatalā pādāntarandhrā bahiḥ।
śīrṣasthāna ihonnataikakaramātrā tānavistārakā madhyataśca caraṇairhastaiśca yuktā dṛḍhaiḥ।।5।।

एवं मारुतहारिभिश्च तरुभिर्द्रोणीं विधायादराद्देवञ्चेभमुखं द्विजानपि भिषग्वृद्धान् प्रपूज्यातिथीन्।
पूर्वाह्ने दिवसे शुभादिमहिते लग्ने तद्द्रोण्यां सेचनमाचरेत् पटुमतिर्द्रव्यैर्यथोक्तैर्भिषक्॥६॥

evaṁ mārutahāaribhiśca tarubhirdroṇīṁ vidhāyādarāddevañcebhamukhaṁ dvijānapi bhiṣagvṛddhān prapūjyātithīn।
pūrvāhne divase śubhādimahite lagne taddroṇyāṁ secanamācaret paṭumatirdravyairyathoktairbhiṣak।।6।।

स्वर्णाद्युत्तमलोहजस्तु करको मृत्सम्भवो वाऽत्र तन्नालाग्रन्तु कनिष्ठकांगुलि परीणाहोन्मितं रोगीणः।
द्विप्रस्थप्रमितो विधाय इति वा मध्यस्थरन्ध्रादधोगच्छद्वर्तिरथोर्ध्वलम्ब्यपि घटः कार्यः शिरस्सेचने॥७॥

svarṇādyuttamalohajastu karako mṛtsambhavo vā'tra tannālāgrantu kaniṣṭhakāṁguli parīṇāhonmitaṁ rogīṇaḥ।
dviprasthapramito vidhāya iti vā madhyastharandhrādadhogacchadvartirathordhvalambyapi ghaṭaḥ kāryaḥ śirassecane।।7।।

ग्राह्यास्ते परिचारकास्स्युरनुरक्तास्सावधानाश्शुभाः तद्धस्तदृढावलंबनवशात्तत्पात्रपातादितः।
भीतिर्ज्जातुचिदातुरस्य तु यथा न स्यात्तथा कारयेद्धारां हस्तयोरपि पृथग्वक्षःस्थले पादयोः।८॥

grāhyāste paricārakāssyuranuraktāssāvadhānāśśubhāḥ taddhastadṛḍhāvalaṁbanavaśāttatpātrapātāditaḥ।
bhītirjjātucidāturasya tu yathā na syāttathā kārayeddhārāṁ hastayorapi pṛthagvakṣaḥsthale pādayoḥ।8।।

यद्वा हस्ततलप्रपूर्णपिचुना सेकं क्वचित् कारयेद्योज्यं स्नेहचतुष्टयं च तिलजं वा तत्र शुद्धेऽनिले।
पित्तेऽस्रे च घृतं कफे तु तिलजं वातेऽस्रपित्तान्विते तैलाज्यन्तु समं कफेन सहिते तैलार्द्धभागं घृतम्॥९॥

yadvā hastatalaprapūrṇapicunā sekaṁ kvacit kārayedyoojyaṁ snehacatuṣṭayaṁ ca tilajaṁ vā tatra śuddhe'nile।
pitte'sre ca ghṛtaṁ kaphe tu tilajaṁ vāte'srapittānvite tailājyantu samaṁ kaphena sahite tailārddhabhāgaṁ ghṛtam।।9।।

अभ्यंगः परिषेचनं पिचुशिरोवस्तिश्च विध्याच्चतुर्भेदं मूर्द्धनि तैलमप्यतिगुणं चैतत्क्रमेणोत्तरम्।

अभ्यंगो विनिहन्ति रौक्ष्यमपि कण्डूं दाहशोफव्रणक्लेदादीन् परिषेचनं पिचुकस्फोटादि चान्त्योऽनिलम्॥ १०॥

abhyaṁgaḥ pariṣecanaṁ picuśirovastiśca vidhyāccaturbhedaṁ mūrddhani tailamapyatiguṇaṁ caitatkrameṇottaram।
abhyaṁgo vinihantiraukṣyamapi kaṇḍūṁ dāhaśophavraṇakledādīn pariṣecanaṁ picukasphoṭādi cāntyo'nilam।।10।।

विधिस्तस्य निषण्णस्य पिठे जनुसमे मृदौ।

शुद्धाक्तस्विन्न्देहस्य दिनान्ते गव्यमाहिषम्।११॥

vidhistasya niṣaṇṇasya piṭhe janusame mṛdau।
śuddhāktasvinndehasya dinānte gavyamāhiṣam।11।।

द्वादशांगुलिविस्तीर्णां चर्मपट्टं शिरःसमम्।

आकर्णबन्धनस्थानं ललाटे वस्त्रवेष्टिते॥ १२॥

dvādaśāṁgulivistīrṇāṁ carmapaṭṭaṁ śiraḥsamam।
ākarṇabandhanasthānaṁ lalāṭe vastraveṣṭite।।12।।

चैलवेणिकया बद्ध्वा माषकल्केन लेपयेत्।

ततो यथाव्याधिश्रृतं स्नेहं कोष्णं निषेचयेत्॥ १३॥

cailaveṇikayā baddhvā māṣakalkena lepayet।
tato yathāvyādhiśṛtaṁ snehaṁ koṣṇaṁ niṣecayet।।13।।

ऊर्द्ध्वं केशभुवो यवद्व्यंगुलं धारयेत्चतं।

आवक्त्रनासिकाक्लेदाद् दशाष्टौ षट् पलादिषु॥ १४॥

ūrddhvaṁ keśabhuvo yavaddvyaṁgulaṁ dhārayetccataṁ।
āvaktranāsikākledād daśāṣṭau ṣaṭ palādiṣu।।14।।

मात्रासहस्राण्यरुजे त्वेकं स्कन्धादि मर्दयेत्।

मुक्तस्नेहस्य परं सप्ताहं तस्य सेवनं॥ १५॥

mātrāsahasrāṇyaruje tvekaṁ skandhādi mardayet।
muktasnehasya paraṁ saptāhaṁ tasya sevanaṁ।।15।।

धारायास्त्वेकवर्षातपहिमपरिशोषाति शुद्धप्रकीर्णं धात्रिप्रस्थं सपादं भिषगथ पटुधीस्सन्त्यजेद्बीजमस्याः।

उत्क्वाथ्याष्टदशाख्यातिकुडवजले षष्टभागावशिष्टं तत्तुल्यञ्चाम्लतक्रं विधिरिति मुनिभिः प्रोक्तमाऽग्नेयमुख्यैः॥ १६॥

dhārāyāstvekavarṣātapahimapariśoṣāti śuddhaprakīrṇaṁ dhātriprasthaṁ sapādaṁ bhiṣagatha paṭudhīssantyajedbījamasyāḥ।
utkvāthyāṣṭadaśākhyātikuḍavajale ṣaṣṭabhāgāvaśiṣṭaṁ tattulyañcāmlatakraṁ vidhiriti munibhiḥ proktamā'gneyamukhyaiḥ।।16।।

e-text prepared by Dr.Pavana.MD.(Ay) & Dr.Manoj Sankaranarayana

धारायाः स्फटिकं सुवर्णरजतप्लक्षादिवृक्षायस्ताम्रवराटिकाप्रथितमृत् पात्रास्त्वतीवोत्तमाः।

केचिद्रोगिकनिष्ठिकान्तविवरं शंसन्ति केचित्तु वा तत्पर्वोपमविस्तृतन्तु सुषिरं पात्रस्य मध्येकृतम्॥ १७॥

dhārāyāḥ sphaṭikaṁ suvarṇarajataplakṣādivṛkṣāyastāmravarāṭikāprathitamṛt pātrāstvatīvottamāḥ|
kecidrogikaniṣṭhikāntavivaraṁ śaṁsanti kecittu vā tatparvopamavistṛtantu suṣiraṁ pātrasya madhyekṛtam||17||

धारायाश्चावसाने निजगदशमनप्रोक्तसर्पिश्च सेव्यं तत्काले चावसंस्थः कथमपि वसतु प्रीतिमानेष रोगी।

कायक्लेशानशेषान्मनसिसुखहरान् वक्त्रजिह्वादिसुखादीन्त्यक्त्वापाटीरशुद्धांबरविधृतवपुर्ब्रह्मविज्ञानि  तुल्यम्॥ १८॥

dhārāyāścāvasāne nijagadaśamanaproktasarpiśca sevyaṁ tatkāle cāvasaṁsthaḥ kathamapi vasatu prītimāneṣa rogī|
kāayakleśānaśeṣānmanasi sukhaharāan vaktrajihvādisukhādīntyaktvāpāṭīraśuddhāṁbaravidhṛtavapurbrahmavijñāni tulyam||18||

केशादीनां च शौक्ल्यंक्लममपितनुतांदोषकोपंशिरोरुग्बाधामोजःक्षयं तत्करचरणपारिस्तोदनं मुत्रदोषम्।

सन्धीनां विश्लथत्वं हृदयरुगरुची जाठराग्नेश्च मान्द्यं धात्रीतक्रोत्थधारा हरति शिरसि वा कर्णनेत्रामयौघम्॥ १९॥

keśādīnāṁ ca śauklyaṁklamamapitanutāṁdoṣakopaṁśirorugbādhāmojaḥkṣayaṁ tatkaracaraṇapāristodanaṁ mutradoṣam|
sandhīnāṁ viślathatvaṁ hṛdayarugarucī jāṭharāgneśca māndyaṁ dhātrītakrotthadhārā harati śirasi vā karṇanetrāmayaugham||19||

स्थैर्यं वाङ्मनसोः शरीरबलमप्याहराकांक्षा  धृतिर्माधुर्यं वचसस्त्वचोऽपि मृदुता नेत्रे प्रकाशोऽगदः।

शुक्लासृक्परिपोषणं रतरर्तिद्दीर्घायुरल्पोष्णता सुस्वप्नं घृततैलसेचनगुणेनास्तीति जाग्रत् सुखम्॥ २०॥

sthairyaṁ vāṅmanasoḥ śarīrabalamapathyāharākāṁkṣā dhṛtirmādhuryaṁ vacasastvaco'pi mṛdutā netree prakāśo'gadaḥ|
śuklāsṛkpariposaṇaṁ ratarartiddīrghāyuralposṇatā susvapnaṁ ghṛtatailasecanaguṇenāstīiti jāgrat sukham||20||

तत्तद्व्याधिशमोदितौषधगणैस्सिद्धञ्च वा योजयेत् स्वस्थेऽभ्यञ्नसेचनादिषु सदा तैलाज्यसम्मिश्रितम्।

एकाहान्तरमेव वा प्रतिदिनं पूर्णे बले मध्यमे त्यक्त्वा द्वित्रिदिनमपोह्यऽल्पे त्रिष्ट् पञ्च वा॥ २१॥

tattadvyādhiśamoditauṣadhagaṇaissiddhañca vā yojayet svasthe'bhyaññasecanādiṣu sadā tailājyasammiśritam|
ekāhāntarameva vā pratidinaṁ pūrṇe bale madhyme tyaktvā dvitridinamapohya'alpe triṣṭ pañca vā||21||

पित्ते कोष्णमथोष्णमेव विहितं शुद्धे समीरामये तत्स्नेहं द्रवमत्रमेव कफयुक्ते रक्तपित्तेऽपि च।

ऊर्ध्वांगे तु सुशीतमेव विहितं सिञ्चेदविच्छिन्नमेवात्यर्थोच्चविलंबितद्रुतनतं कुत्रापि नैवाचरेत्॥ २२॥

e-text prepared by Dr.Pavana.MD.(Ay) & Dr.Manoj Sankaranarayana

pitte koṣṇamathoṣṇameva vihitaṁ śuddhe samīrāmaye tatsnehaṁ dravamatrameva kaphayukte raktapitte'pi ca।
ūrddhvāṁge tu suśītameva vihitaṁ siñcedavicchinnamevātyartthoccavilaṁbitadrutanataṁ kutrāpi naivācaret।।22।।

रूक्षे पित्तयुतेऽनिले च परमः कालो मूहौर्त्तद्वयं सार्द्धं तत्र तदर्द्धमात्र उदितः स्निग्द्धे कफोन्मिश्रिते।

यातत्स्वेदसमुद्भवो भवति तत्तावन्निवर्त्तेत वा स्नेहोऽत्र त्रिभिरेति रोमविवरं मात्राशतैश्च क्रमात्॥ २३॥

rūkṣe pittayute'nile ca paramaḥ kālo mūhaūrttadvayaṁ sārddhaṁ tatra tadarddhamātra uditaḥ snigddhe kaphonmiśrite ।
yātatsvedasamudbhavo bhavati tattāvannivartteta vā sneho'tra tribhireti romavivaraṁ mātrāśataiśca kramāt ।।23।।

सप्तापि त्वच एति सप्तभिरथो षड्भिस्तथास्राादिकन्षड्धातूनिषुसिन्धुदिग्ग्रहमिता मात्रा मूहूर्त्तो भवेत्।

धारोच्चं चतुरंगुलं तु शिरसस्सेके तदन्यत्र तत् प्रोक्तं तन्त्रिगुणं मन्दपतनात्तद्रोगवृद्धिर्भवेत्॥ २४॥

saptāpi tvaca eti saptabhiratho ṣaḍbhistathāsrādikanṣaḍdhātūniṣusindhudiggrahamitā mātrā mūhūrtto bhavet ।
dhāroccaṁ caturaṁgulaṁ tu śirasasseke tadanyatra tat proktaṁ tantriguṇaṁ mandapatanāttadrogavṛddhirbhavet।।24।।

अत्युच्चद्रुतभूरिकालपरिशेकाद्दाहवीसर्परुङ्मूर्च्छाङ्गस्वरसादसन्धिदलनच्छर्द्यस्रपित्तज्वराः।

कोठाद्याश्च भवन्त्यतः परदिने गण्डूषनस्यादिकं कृत्वा शुद्धमौषधेन सुश्रृतं तोयं पुनः पाययेत्॥ २५॥

atyuccadrutabhūrikālapariśekāddāhavīsarparuṅmūrcchāṅgasvarasādasandhidalan accharddyasrapittajvarāḥ।
koṭhādyāśca bhavantyataḥ paradine gaṇḍūṣanasyādikaṁ kṛtvā śuddhamauṣadhena suśṛtaṁ toyaṁ punaḥ pāyayet।।25।।

सायाह्ने लघु भोजयेत् कटुतरं यूषान्वितञ्चाप्यथो वस्तिं स्नेहकृतञ्च सैन्धवकृतं कुर्यात्तृतियेऽहनि।

स्नेहव्यापदि चोक्तकर्मनिखिलं कुर्याच्चतुर्थेह्न्यतः प्राग्वत्स्नेहनिषेवणञ्च विधिवत्कुर्याद्दिने पञ्चमे॥ २६॥

sāyāhne laghu bhojayet kaṭutaraṁ yūṣānvitañcāpyatho vastiṁ snehakṛtañca saindhavakṛtaṁ kuryāttṛtiye'hani।
snehavyāpadi coktakarmanikhilaṁ kuryāccaturtthehnyataḥ prāgvatsnehaniṣevaṇañca vidhivatkuryāddine pañcame।।26।।

एकाहादपरन्नसेचनविधौ क्षीरादिकं गृह्यते धान्याम्लं त्रिदिनात्परं विधिरयं स्नेहस्य तु प्रायशः।

एकेन त्रिदिनं परेण च च तथा सिञ्चेत्त्र्यहं तद्द्वयं मिश्रीकृत्य च सप्तमेऽहनि पुनस्त्यक्त्वैनमेवं चरेत्॥ २७॥

ekāhādaparannasecanavidhau kṣīrādikaṁ gṛhyate dhānyāmlaṁ tridinātparaṁ vidhirayaṁ sneahasya tu prāyaśaḥ।
ekena tridinaṁ pareṇa ca ca tathā siñcettryahaṁ taddvayaṁ miśrīkṛtya ca saptame'hani punastyaktvainamevaṁ caret।।27।।

यन्नुत्नेन निषेचनं प्रतिदिनं तत्तुत्तमं मध्यमं तेनैव त्रिदिनं ततोऽपि च परं मिश्रीकृतं चाधामम्।

अत्युष्णेऽपि च् मन्दकोपसम्ये मन्दातपे शीतले कुर्यान्नत्वपराह्णकेऽपि भिषग्रात्रौ तथा सेचनम्॥ २८॥

yannutnena niṣecanaṁ pratidinaṁ tattuttamaṁ madhyamaṁ tenaiva tridinaṁ tato'pi ca paraṁ miśrīkṛtaṁ cādhāmam।
atyuṣṇe'pi c mandakopasamye mandātape śītale kuryānnatvaparāhnake'pi bhiṣagrātrau tathā secanam।।28।।

सेकानन्तरमातुरस्तु शिशिराम्बुप्रोक्षणैः ष्ठीवनैश्चोत्क्षेपैर्म्मृदुमारुतैरनुगुणं विश्राम्यतत्रोत्थितः।

मन्दं किञ्चन मर्द्दितोऽनु च रसैः स्नेहं कषायैस्त्यजेत् स्नात्वा कोष्णजलैस्सुगन्धसुभगो धान्यौषधाम्भः पिबेत्॥ २९॥

sekānantaramāturastu śiśirāmbuprokṣaṇaiḥ ṣṭhīvanaiścotkṣepairmmṛdumārutairanuguṇaṁ viśrāmyatatrotthitaḥ।
mandaṁ kiñcana marddito'nu ca rasaiḥ snehaṁ kaṣāyaistyajet snātvā koṣṇajalaissugandhasubhago dhānyauṣadhāmbhaḥ pibet।।29।।

पेयं वा लघु सोषणाज्यकटुतक्रयूषयुक्तं मितं भुक्तं कोष्णमथाऽचरेद्विधिमतः स्नेहोक्तमात्राखिलं।

एवं सप्तदिनं व्यतीत्य पुनरन्येध्युर्विरेकं ततो वस्तिं तत्र तु कारयेदिति विधिर्न्नासत्यसंभाषितः॥ ३०॥

peyaṁ vā laghu soṣaṇājyakaṭutakrayūṣayuktaṁ mitaṁ bhuktaṁ koṣṇamathā'caredvidhimataḥ snehoktamātrākhilaṁ ।
evaṁ saptadinaṁ vyatītya punaranyedhyurvirekaṁ tato vastiṁ tatra tu kārayediti vidhirnnāsatyasaṁbhāṣitaḥ।।30।।

भोज्यान्नं मात्रापस्यन् श्वः पिबेन्पीतवानपि।

द्रवोष्णमनभिष्यन्दि नातिस्निग्धमसंकरम्॥ ३१॥

bhojyānnaṁ mātrāpasyan śvaḥ pibenpītavānapi।
dravoṣṇamanabhiṣyandi nātisnigdhamasaṁkaram।।31।।

उष्णोदकोपचारी स्याद् ब्रह्मचारी क्षपाशयः।

न वेगरोधि व्यायामक्रोधशोकहिमातपान्॥ ३२॥

uṣṇodakopacārī syād brahmacārī kṣapāśayaḥ।
na vegarodhi vyāyāmakrodhaśokahimātapān।।32।।

प्रवातयानयानाद्ध्वभाष्यात्यासनसंस्थितीः।

नीचात्युचोपधानाहः स्वप्नधूमरजांसि च॥ ३३॥

pravātayānayānāddhvabhāṣyātyāsanasaṁsthitīḥ।
nīcātyucopadhānāhaḥ svapnadhūmarajāṁsi ca।।33।।

यान्यहानि पिबेत्तानि तावन्त्यन्यानपि त्यजेत्।

सर्वकर्मस्वयं प्रोयो व्याधिक्षीणेषु च् क्रमः॥ ३४॥

yānyahāni pibettāni tāvantyanyānapi tyajet।
sarvakarmasvayaṁ proyo vyādhikṣīṇeṣu c kramaḥ।।34।।

e-text prepared by Dr.Pavana.MD.(Ay) & Dr.Manoj Sankaranarayana

अतिस्निग्धे तु पाण्डुत्वं घ्राणावक्त्रगुदस्रवाः।

अमात्रयाऽहिते काले मित्याहारविहारतः॥३५॥

atisnigdhe tu pāṇḍutvaṁ ghrāṇāvaktragudasravāḥ|
amātrayā'hite kāle mityāhāravihārataḥ||35||

स्नेहः करोति शोफाऽर्शोस्तन्द्रस्तंभविसंज्ञताः।

snehaḥ karoti śophāa'ārśostandrastaṁbhavisaṁjñatāḥ|

कण्डूकुष्ठज्वरोत्क्लेशशूलानाहभ्रमादिकान्।३६॥

kaṇḍūkuṣṭhajvarotkleśaśūlānāhabhramādikān|36||

क्षुत्तृष्णोल्लेखनस्वेदरूक्षपानान्नभेषजम्।

kṣuttṛṣṇollekhanasvedarūkṣapānānnabheṣajam|

तक्रारिष्टं खलोद्दालयश्यामाककोद्रवाः॥३७॥

takrāriṣṭaṁ khaloddālayaśyāmākakodravāḥ||37||

पिप्पलीत्रिफाक्षौद्रपत्थ्यागोमूत्रगुल्गुलु।

pippalītriphākṣaudrapatthyāgomūtragulgulu|

यथास्वं प्रतिरोगं च स्नेहव्यापदि साधनम्॥३८।

yathāsvaṁ pratirogaṁ ca snehavyāpadi sādhanam||38|

यावन्त्यौषधयोजितानि दिवसान्येतानि तावन्त्यहान्यन्यान्यप्यथ सर्वकर्मसु बुधो नित्यं जितात्मा नयेत्।

स्त्रीणां स्पर्षनदर्शनस्मृतिवशाच्चूक्ले स्रुते सन्ति तत् सम्पर्केण विनापि तत्भवगदास्तस्मात् त्यजेत् सर्वदा॥३९॥

yāvantyauṣadhayojitāni divasānyetāni tāvantyahānyanyānyapyatha sarvakarmasu budho nityaṁ jitātmā nayet|
strīṇāṁ sparṣanadarśanasmṛtivaśāccūkle srute santi tat samparkeṇa vināpi tatbhavagadāstasmāt tyajet sarvadā||39||

गुल्मानाहभगन्दरव्रणतुनीशूलाभिघातस्रवातोदोवर्त्तककोठमूढमरुदष्ठीलावीर्सपादिषु।

gulmānāhabhagandaravraṇatunīśūlābhighātasravātodovarttakakoṭhamūḍhamarud aṣṭhīlāvīrsapādiṣu |

प्लीहाद्ध्मानकविद्रधिप्रतुनि तुनीष्वेकांगसेकं तथा कुर्याद्धस्ततलप्रपूर्णपिचुना मन्दं सुखोष्णं भिषक्॥४०॥

plīhāddhmānakavidradhipratuni tunīṣvekāṁgasekaṁ tathā kuryāddhastatalaprapūrṇapicunā mandaṁ sukhoṣṇaṁ bhiṣak||40||

व्यायामातपवेगरोधहिमधूमात्युच्चनिचोपधानाहः स्वप्नरजः प्रवातचिरकालासीनतासंस्तितिः।

vyāyāmātapavegarodhahimadhūmātyuccanicopadhānāhaḥ svapnarajaḥ pravātacirakālāsīnatāsaṁstitiḥ|

शोकं जागरपादयानगमनक्रोधातिभाष्यदिकांस्त्याक्त्वास्थोष्णजलोऽपचार्यनतिभुक्स्यात् ब्रह्मचारी सदा॥४१॥

śokaṁ jāgarapādayānagamanakrodhātibhāṣyadikāṁstyāktvāsthoṣṇajalo'pacāryanatibhuksyāt brahmacārī sadā||41||

॥इति श्री भोजराजविरचितं धाराकल्पः॥

||iti śrī bhojarjāaviracitam dhārākalpaḥ||

e-text prepared by Dr.Pavana.MD.(Ay) & Dr.Manoj Sankaranarayana